শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৫০

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায় পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায় নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৫০

*ৱৎসাসুরৱধৱর্ণনম্ বকাসুরৱধৱর্ণনং চ*

তরলমধুকৃদ্ৱৃন্দে ৱৃন্দাৱনেথ মনোহরে
    পশুপশিশুভিঃ সাকং ৱৎসানুপালনলোলুপঃ।
হলধরসখো দেৱ শ্ৰীমন্ ৱিচেরিথ ধারযন্
    গৱলমুরলীৱেত্ৰং নেত্ৰাভিরামতনুদ্যুতিঃ॥ ১ ॥

ৱিহিতজগতীরক্ষং লক্ষ্মীকরাম্বুজলালিতং
    দদতি চরণদ্বন্দ্বং ৱৃন্দাৱনে ত্ৱযি পাৱনে।
কিমিৱ ন বভৌ সম্পৎসম্পূরিতং তরুৱল্লরী-
    সলিলধরণীগোত্ৰক্ষেত্ৰাদিকং কমলাপতে॥ ২ ॥

ৱিলসদুলপে কান্তারান্তে সমীরণশীতলে
    ৱিপুলযমুনাতীরে গোৱর্ধনাচলমূর্ধসু।
ললিতমুরলীনাদঃ সঞ্চারযন্ খলু ৱাৎসকং
    ক্ৱচন দিৱসে দৈত্যং ৱৎসাকৃতিং ত্ৱমুদৈক্ষথাঃ॥ ৩ ॥

রভসৱিলসৎপুচ্ছং ৱিচ্ছাযতোস্য ৱিলোকযন্
    কিমপি ৱলিতস্কন্ধং রন্ধ্ৰপ্ৰতীক্ষমুদীক্ষিতম্।
তমথ চরণে বিভ্ৰদ্বিভ্ৰামযন্ মুহুরুচ্চকৈঃ
    কুহচন মহাৱৃক্ষে চিক্ষেপিথ ক্ষতজীৱিতম্॥ ৪ ॥

নিপততি মহাদৈত্যে জাত্যা দুরাত্মনি তৎক্ষণং
    নিপতনজৱক্ষুণ্ণক্ষোণীরুহক্ষতকাননে।
দিৱি পরিমিলদ্ৱৃন্দা ৱৃন্দারকাঃ কুসুমোৎকরৈঃ
    শিরসি ভৱতো হর্ষাদ্বর্ষন্তি নাম তদা হরে॥ ৫ ॥

সুরভিলতমা মূর্ধন্যূর্ধ্ৱং কুতঃ কুসুমাৱলী
    নিপততি তৱেত্যুক্তো বালৈঃ সহেলমুদৈরযঃ।
ঝটিতি দনুজক্ষেপেণোর্ধ্ৱং গতস্তরুমণ্ডলাত্
    কুসুমনিকরঃ সোযং নূনং সমেতি শনৈরিতি॥ ৬ ॥

ক্বচন দিৱসে ভূযো ভূযস্তরে পরুষাতপে
    তপনতনযাপাথঃ পাতুং গতা ভৱদাদযঃ।
চলিতগরুতং প্রেক্ষামাসুর্বকং খলু ৱিস্মৃতং
    ক্ষিতিধরগরুচ্ছেদে কৈলাসশৈলমিৱাপরম্॥ ৭ ॥

পিবতি সলিলং গোপৱ্রাতে ভৱন্তমভিদ্রুতঃ
    স কিল নিগিলন্নগ্নিপ্রখ্যং পুনর্দ্রুতমুদ্ৱমন্।
দলযিতুমগাত্ ত্রোট্যাঃ কোট্যা তদাশু ভৱান্ ৱিভো
    খলজনভিদাচুঞ্চুশ্চুঞ্চূ প্রগৃহ্য দদার তম্॥ ৮ ॥

সপদি সহজাং সন্দ্রষ্টুং ৱা মৃতাং খলু পূতনা-
    মনুজমঘমপ্যগ্রে গত্বা প্রতীক্ষিতুমেৱ ৱা।
শমননিলযং যাতে তস্মিন্ বকে সুমনোগণে
    কিরতি সুমনোৱৃন্দং ৱৃন্দাৱনাত্ গৃহমৈযথাঃ॥ ৯ ॥

ললিতমুরলীনাদং দূরান্নিশম্য ৱধূজনৈ-
    স্তৱরিতমুপগম্যারাদারূঢমোদমুদীক্ষিতঃ।
জনিতজননীনন্দানন্দঃ সমীরণমন্দির-
    প্রথিতৱসতে শৌরে দূরীকুরুষ্ৱ মমামযান্॥ ১০ ॥

**********